# Panchagangashtakam

# પઞ્ચગઙ્ગાષ્ટકમ્

## Document Information

Text title : Panchagangashtakam

File name : panchagangAShTakam.itx

Category : devii, devI, nadI, aShTaka

Location : doc_devii

Transliterated by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Proofread by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Description/comments : Ganga Jnana Mahodadhi compiled by Acharya Ramapada Chakravarty

Latest update : June 13, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2020

*sanskritdocuments.org*

Panchagangashtakam

# પઞ્ચગઙ્ગાષ્ટકમ્

શ્રીગણેશાય નમઃ ।

ગઙ્ગા શિવા હિ યમુનાઽપિ ચ પુણ્યતોયા
    વાણી પવિત્રકિરણા વરધૂતપાપા ।
શ્રીબિન્દુમાધવહરેઃ પુરતો વિચિત્રા
    કાશ્યાં સદા વિજયતે વરપઞ્ચગઙ્ગા ॥ ૧॥

પ્રાતઃ સદા મુનિગણાઃ સકલાશ્ચ દેવાઃ
    સ્નાનાય૧ માધવપુરઃસરમાપતન્તિ । (૧. સ્નાનાર્થ પાઠાન્તર)
યસ્યાં સ્થિરો ભવતિ માધવ આદિદેવઃ
    સેયં સદા વિજયતે વરપઞ્ચગઙ્ગા ॥ ૨॥

યસ્યાં સદા હરિહરૌ વસતઃ૨ પ્રસન્નૌ (૨. રમતઃ પાઠાન્તર)
    ધર્મદ્રવાં જનહિતાં કવયો ગૃણન્તિ ।
ધ્યાયન્તિ યાં શુભકરીં કલિકલ્મષઘ્નીં
    સેયં સદા વિજયતે વરપઞ્ચગઙ્ગા ॥ ૩॥

સંપ્રાપ્ય તે સુકૃતિનઃ શિવરાજધાનીં
    કાશીં  ભજન્તિ મુદિતા વરપઞ્ચગઙ્ગામ્ ।
તે દુસ્તરાં ગુણમયીં પ્રતરન્તિ માયાં
    લોકં પુનન્તિ સકલં શિવભક્તિયુક્તાઃ ॥ ૪॥

ગર્જન્તિ પાપકરિણો ભયદા હિ તાવદ્
    યાવજ્જનો ન ભજતે વરપઞ્ચગઙ્ગામ્ ।
યાં ગચ્છતઃ પ્રતિપદં ભવતિ પ્રપુણ્યં
    તાં ત્વાં નમામિ સતતં હૃદિ પઞ્ચગઙ્ગે ! ॥ ૫॥

ત્યક્તા અપિ પ્રિયજનૈરતિપાપયુક્તા
    રોગાદિભિઃ પરિવૃતા અતિદુઃખયુક્તાઃ ।
દૈવાદ્યદિ ત્વયિ પતન્ત્યથ પઞ્ચગઙ્ગે !

તેનૈવ તે સુકૃતિનઃ પરમં વ્રજન્તિ ॥ ૬॥

ત્વન્નામ દુર્લભમિદં તવ દર્શનઞ્ચ
ત્વં કાન્તિકે ત્વતિતરાં જનદુર્લભાઽસિ ।
ત્વય્યેવ ભક્તિમમલાં વરદે ! પ્રદેહિ
કાશ્યાં શિવે! હરિપદે સુજને શ્રુતૌ ચ ॥ ૭॥

સ્તોતું ન કોઽપ્યલમનન્તગુણે ! તથાપિ
સદ્ભિઃ પ્રવર્તિત ઇતિ પ્રવદામિ કિઞ્ચિત્ ।
તન્મે ક્ષમસ્વ શિશુભાવનયા સતિ ! ત્વં
પ્રાતઃ પ્રસીદ સુભગે ! મયિ પઞ્ચગઙ્ગે ! ॥ ૮॥

ગઙ્ગાષ્ટકમિદં પુણ્યં ભુક્તિમુક્તિપ્રદં નૃણામ્ ।
સત્યજ્ઞાનાનદે તીર્થે યતિના રચિતં મુદે ॥ ૯॥

ઇદં સ્તોત્રં તુ રચિતં તૈલઙ્ગશાસ્ત્રિશર્મણા ।
લિખિતં દુણ્ઢિરાજેન સ્તોત્રં સમ્પૂર્ણમુચ્યતે ॥ ૧૦॥

ઇદં સ્તોત્રં પઠેન્નિત્યં યઃ સ્મરેત્પુણ્યવાન્નરઃ ।
તસ્ય મુક્તિસ્તુ જાયેત અત્રાંશે નાસ્તિ સંશયઃ ॥ ૧૧॥

લિખિતં દુણ્ઢિરાજેન કાલોપાખ્યેન ધીમતા ।
દેવીદાશર્મણા સાર્ધં પુસ્તકં દત્તમેવ ચ ॥ ૧૨॥

સ્તોત્ર-ટિપ્પણી- અષ્ટકમિદં પાણ્ડુલિપિરૂપેણ રામાપુર-વારાણસીસ્થાદ
આચાર્યબ્રહ્મગોપાલભાદુડ઼ીમહાશયસ્ય પુસ્તકાલયાદસ્માભિઃ સઙ્ગૃહીતમ્ ।
સ્તોત્રસ્ય દશમશ્લોકે તૈલઙ્ગશાસ્ત્રિશર્મા અસ્ય રચયિતેત્યુક્તમ્ ।
પુષ્પિકાયામસ્ય રચનાકાલઃ સંવત્ ૧૭૮૮ ઇત્યુલ્લિખિતમ્ । અતઃ ખ્રીષ્ટાબ્દસ્ય
૧૭૩૧ તમે વર્ષે લિખિતમેતત્ કેનચિત્ ઢુણ્ઢિરાજેન ઇતિ પ્રતીયતે । એષ
એવ તૈલઙ્ગશાસ્ત્રિશર્મા સુપ્રસિદ્ધો યોગી તૈલઙ્ગાસ્વામીતિ વિજ્ઞાયતે ।
શ્લોકેષુ કાશ્ચનાશુદ્ધયોઽસ્માભિર્લક્ષિતાઃ । સ્વબુદ્ધયા તાઃ સંશોધ્ય
શુદ્ધપાઠઃ મૂલપાઠે નિવેશિતઃ । હસ્તલેખસ્યાશુદ્ધપાઠાઃ
તત્તત્સ્થાને સઙ્ખ્યાક્રમેણ સ્તોત્રસ્યાધસ્તાદુલ્લિખિતાઃ ॥

કાશ્યાં તૈલઙ્ગસ્વામી પઞ્ચગઙ્ગાઘટટે સન્યાસિનામાશ્રમે
મૃત્યુપર્યન્તં ૧૮૮૭ ખ્રીષ્ટાબ્દં યાવત્ દિગમ્બરાવસ્થાયાં ન્યવસત્ ।
શ્રૂયતે તથાઽનુમીયતે યત્ તૈલઙ્ગસ્વામિનો મુખાદબાધગત્યા

નિઃસૃતં પઞ્ચગઙ્ગાષ્ટકમિદં પ્રત્યહં તદીયપ્રમુખભક્તો
દેવીદાનામકઃ શ્રુતવાન્ । દેવીદામહોદયસ્ય સ્વેચ્છયા પ્રાર્થનયા
ચ ઢુણ્ઢિરાજેનાષ્ટકમિદં લિપિબદ્ધમકારિ । આરમ્ભેઽષ્ટૌ શ્લોકા
વસન્તતિલકાચ્છન્દઃસુ તૈલઙ્ગસ્વામિના રચિતાઃ, અન્તે ચત્વારઃ
શ્લોકાશ્ચાનુષ્ટુપ્છન્દઃસુ લેખકેન વિરચિતાઃ સંયોજિતાશ્ચેત્યનુમીયતે ।

ઇતિ પઞ્ચગઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Anil Kumar Pandey anil.kumar17pandey at gmail.com

*Panchagangashtakam*

pdf was typeset on June 13, 2020

Please send corrections to *sanskrit@cheerful.com*